सप्तमः पाठः

# तरवे नमोऽस्तु



**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।**

**( विद्यालये वृक्षारोपण-उत्सवः )**

**प्रत्यूषः** अर्णव! त्वम् अद्य कं वृक्षम् आरोपयितुम् आनीतवान् ?

**अर्णवः** मया तु आम्रवृक्षस्य पादपः आनीतः।

**सौरभः** अहं तु अर्जुनवृक्षस्य पादपम् आनीतवान्।

**ऋषभः** मया तु हरिशृङ्गारः आनीतः।

**आचार्यः** छात्राः! धन्याः ननु यूयं यत् वृक्षान् प्रति एवं समादरभावं धारयथ।

**प्रत्यूषः** आचार्य! एषा भवतामेव प्रेरणा।

**अर्णवः** आचार्यवर! उत्सवे केषां पद्यानां गायनं करणीयम् ?

**आचार्यः** मणिकापुस्तके यानि पद्यानि सप्तमे पाठे दत्तानि तेषामेव सस्वरं पाठं करिष्यामः।

**छात्राः** आम्! आम्! पठामः, गायामः, वृक्षान् प्रति कृतज्ञतां च अनुभवामः।

सप्तमः पाठः

# तरवे नमोऽस्तु

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥ 1॥

अहो! एषां वरं जन्म सर्वप्राण्युपजीवनम्।
धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः॥ 2॥

पत्र-पुष्प-फलच्छाया-मूल-वल्कलदारुभिः।
गन्ध-निर्यास-भस्मास्थितोक्मैः कामान्वितन्वते॥ 3॥

आम्र! यद्यपि गता दिवसास्ते पुष्पसौरभफलप्रचुरा ये।
हन्त! सम्प्रति तथापि जनानां छाययैव दलयस्यतितापम्॥ 4॥

मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहङ्गैः कुसुमानि भृङ्गैः।
नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्त्वभरैः समन्तात्॥ 5॥

निम्ब! त्वदीयकटुता यदि दाहहन्त्री,
गायन्तु मूढमनुजास्तव दोषगाथाः।
तप्तास्त एव तपनोपमपित्ततापैः
गास्यन्ति मित्रवर! तावकगीतकानि॥ 6॥

धत्ते भरं कुसुमपत्रफलावलीनां घर्मव्यथां वहति शीतभवां रुजं च।
यः सर्वमर्पयति चान्यसुखस्य हेतोः तस्मै वदान्यगुरवे तरवे नमोऽस्तु॥ 7॥

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अर्थिनः** (सं०) (अर्थिन् प्र०ब०व०) | अभिलषिण, प्रार्थयितारः | प्रार्थना (कामना) करने | desirous. |
| **आतपे** (सं०) [पुं० स०ए०व०] | घर्मे | धूप में | in sunshine. |

| | | | |
|---|---|---|---|
| **उपजीवनम्**<br>(वि०)(उपजीवन्ति अनेन इत्यर्थे ल्युट्);<br>[उप+जीव्+ल्युट् (नपुं०)] | आश्रयः | आश्रय (शरण) देने वाला | a means of subistence |
| **घर्मव्यथाम्**<br>(सं०)[घर्मस्य व्यथाम् (ष०त०पु०] | आतपजन्याघातम् | घाम के कष्ट को | heatstroke |
| **तपनोपमपित्ततापैः**<br>[तपनः उपमा यस्य इति तपनोपमम्<br>(बहु०व्री०) तपनोपमं च तत्पित्तम् (कर्म०<br>धा०) तस्य तापैः (ष०त०] | सूर्यसदृशतीव्रपित्तदोषैः | सूर्य के समान तपाने वाले पित्त की गर्मी से | affected by the burning sun like heat of the bile |
| **तोक्मैः**<br>(सं०)(पु०तृ०ब०व०) | त्वग्भिः | त्वचा<br>(चमड़ी, खाल से) | with skin. |
| **दलयसि**<br>(क्रि०) [दल्+लट् म०पु०ए०व०] | नाशयसि | दूर करते हो | keep away (the troubles) |
| **दारुभिः**<br>(सं०) (पु०तृ०ब०व०) | काष्ठैः | लकड़ियों से | with woods. |
| **दाहहन्त्री**<br>[दाहस्य हन्त्री (ष०त०पु०)] | पित्ततापनिवारिका | जलन को शान्त करने वाली | provides relief by killing the burning sensation. |
| **दोषगाथाः**<br>(सं०)[दोषाणां गाथाः, ष०त०] | अवगुणानां वार्ताः | अवगुणों (बुराइयों) से सम्बन्धित कथाएँ | stories relating vices. |
| **निर्यासः**<br>(सं०) (पुं०प्र०ए०व०) | वृक्षरस | पेड़ का रस (गोंद आदि) | sap of the tree. |
| **परार्थाय**<br>(सं०)(पुं०च०ए०व०] | (परस्मै इति परार्थम्/ परार्थाय), अन्यस्मै | दूसरों के लिए | for others. |
| **प्लवङ्गैः**<br>(सं०)(पु०तृ०ब०व०) | वानरैः | बन्दरों से | with monkeys. |
| **भुजङ्गैः**<br>(सं०) (पुं०तृ०ब०व०) | सर्पैः | साँपों से | with snakes. |
| **भृङ्गैः**<br>(सं०) (पुं०तृ०ब०व०) | भ्रमरैः | भौरों से | with bees. |
| **महीरुहाः**<br>(सं०)(प्र०ब०व०)<br>[मह्याः रोहन्ति (उप०त०पु०)] | वृक्षाः | पेड़ | trees. |

| | | | |
|---|---|---|---|
| **रुजम्**<br>(सं०)(स्त्री० द्वि० ए० व०) | पीडाम् | पीड़ा को | agony. |
| **वदान्यगुरवे**<br>(वि०)(पुं० च०ए०व०)[वदान्येषु उदारेषु गुरुः श्रेष्ठः तस्मै (स०त०पु०)] | उदारेषु श्रेष्ठाय | उदारों में श्रेष्ठ के लिए, महादानी के लिए | for one hoghly generous. |
| **वितन्वते**<br>(कामान्) (क्रि०)<br>[वि+तन्+लट्, प्र०पु०ब० व०, आ०]) | पूरयन्ति<br>(मनोरथान्) | पूरा करते हैं<br>(इच्छाओं को) | fulfill the desires. |
| **विहङ्गैः**<br>(सं०)(पु०तृ०ब०व०) | खगैः | पक्षियों के द्वारा | by the birds. |
| **सत्वभरैः**<br>(सं०)(पु०तृ०ब०व०) | प्राणिसमूहैः | जीवजन्तुओं से | with different creatures. |
| **समन्तात्**<br>(अव्य०) | परितः | चारों ओर से | from all sides. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| फलान्यपि | = | फलानि+अपि | सर्वप्राण्युपजीवनम् | = | सर्वप्राणि+उपजीवनम् |
| नार्थिनः | = | न+अर्थिनः | दिवसास्ते | = | दिवसाः+ते |
| छाययैव | = | छायया+एव | दलयस्यतितापम् | = | दलयसि+अतितापम् |
| येभ्यो निराशा | = | येभ्यः+निराशाः | नास्त्येव | = | न+अस्ति+एव |
| यन्नाश्रितम् | = | यत्+न+आश्रितम् | मूढमनुजास्तव | = | मूढमनुजाः+तव |
| नमोऽस्तु | = | नमः+अस्तु | तप्तास्त एव | = | तप्ताः+ते+एव |
| तच्चन्दनपादपस्य | = | तत्+चन्दनपादपस्य | एषां वरम् | = | एषाम्+वरम् |

### सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| यः+सर्वमर्पयति | = | यस्सर्वमर्पयति | हेतोः+तस्मै | = | हेतोस्तस्मै |
| शीतभवाम्+रुजम् | = | शीतभवां रुजम् | तथा+अपि | = | तथापि |

**संयोगः**

| | | | | | |
|---|---|---|---|---|---|
| छायामन्यस्य | = | छायाम्+अन्यस्य | स्वयमातपे | = | स्वयम्+आतपे |
| सर्वमर्पयति | = | सर्वम्+अर्पयति | | | |

## अभ्यासः

**1. संस्कृतभाषया एकपदेन उत्तरं लिखत –**

(क) सत्पुरुषाः इव के सन्ति ? ....................................

(ख) अर्थिनः केभ्यो निराशाः न यान्ति ? ....................................

(ग) वृक्षः कस्य सुखस्य हेतोः सर्वमर्पयति ? ....................................

(घ) आम्रः जनानाम् अतितापं कया दलयति ? ....................................

(ङ) कस्य तरोः कटुता दाहहन्त्री ? ....................................

(च) चन्दनस्य शाखाः कैराश्रिताः ? ....................................

(छ) कस्य मूलं भुजङ्गैः आश्रितम् ? ....................................

**2. संस्कृतभाषया पूर्णवाक्येन उत्तरं लिखत –**

(क) वृक्षाः परेभ्यः किं कुर्वन्ति ?

........................................................................................................................

(ख) महीरुहाः किमर्थं धन्याः ?

........................................................................................................................

(ग) तरवः कैः साधनैः अपरेषां कामान् वितन्वते ?

........................................................................................................................

(घ) चन्दनपादस्य विविधानि अङ्गानि कैः आश्रितानि ?

........................................................................................................................

(ङ) मूढमनुजाः किं गायन्ति ?

........................................................................................................................

(च) वृक्षः अन्यसुखस्य हेतोः किं धत्ते ?

........................................................................................................................

**3. स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) वृक्षाणां फलानि अपि **परार्थाय** भवन्ति। ..............................................

(ख) तरवः स्वविभूतिभिः **सर्वेषां** कामान् पूरयन्ति। ..............................................

(ग) चन्दनपादपः समन्तात् **सत्त्वैः** आश्रितः वर्तते। ..............................................

(घ) वृक्षाः स्वयम् **आतपे** तिष्ठन्ति। ..............................................

(ङ) चन्दनस्य मूलं **भुजङ्गैः** आश्रितम्। ..............................................

(च) **तरवे** नमः अस्तु। ..............................................

(छ) महारुहेभ्यः **अर्थिनः** निराशाः न यान्ति। ..............................................

**4. अधोलिखितप्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः।' अस्मिन् वाक्ये कर्तृपदं किम्?

(ख) 'गायन्तु मूढमनुजास्तव दोषगाथाः' अस्मिन् वाक्ये 'मूढमनुजाः' इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम्?

(ग) 'निम्ब ! त्वदीय-कटुता यदि दाहहन्त्री।' अस्मिन् वाक्ये 'मधुरता' इति पदस्य किं विलोमपदं प्रयुक्तम् अस्ति?

(घ) 'अहो! एषां वरं जन्म सर्वप्राण्युपजीवनम्।' अस्मिन् वाक्ये 'वरम्' इति पदस्य किं विशेष्यपदं प्रयुक्तम् अस्ति?

(ङ) पाठात् 'याचकाः' इति पदस्य पर्यायपदं चित्वा लिखत।

**5. समुचितान् विपर्ययान् चित्वा लिखत–**

| | | | | |
|---|---|---|---|---|
| (क) | कटुता | .............................................. | (i) | गुणगाथाः |
| (ख) | दोषगाथाः | .............................................. | (ii) | छाया |
| (ग) | जन्म | .............................................. | (iii) | आशा |
| (घ) | आतपः | .............................................. | (iv) | मरणम् |
| (ङ) | निराशा | .............................................. | (v) | मधुरता |

**6. कोष्ठकात् शुद्धम् अर्थं चित्वा लिखत –**

| | | |
|---|---|---|
| (क) घर्मः | .............................................. | (धर्मः, आतपः) |
| (ख) दारुभिः | .............................................. | (काष्ठैः, मदिराभिः) |
| (ग) महीरुहाः | .............................................. | (नृपाः, वृक्षाः) |
| (घ) समन्तात् | .............................................. | (सर्वतः, उभयतः) |
| (ङ) प्लवङ्गैः | .............................................. | (मृगैः, वानरैः) |

**7. अधोलिखितस्य श्लोकस्य समुचितं शीर्षकं चिनुत -**

(अ) **मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहङ्गैः कुसुमानि भृङ्गैः।**
**नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्वभरैः समन्तात्॥**

(i) आश्रयदाता चन्दनपादपः

(ii) विषाक्तः चन्दनवृक्षः

(iii) सुरभितः चन्दनवृक्षः

(आ) **'कैः किम् आश्रितम्' इति विचार्य समुचितमेलनं कुरुत–**

| | | | |
|---|---|---|---|
| (क) | भुजङ्गैः | (i) | कुसुमानि |
| (ख) | प्लवङ्गैः | (ii) | मूलम् |
| (ग) | विहङ्गैः | (iii) | शिखरम् |
| (घ) | भृङ्गैः | (iv) | शाखाः |

**8. कथनमाधृत्य वृक्षस्य नाम लिखत -**

**यथा**– अहं छायारहितः सन्नपि मधुरफलैः सर्वान् तर्पयामि। खर्जूरवृक्षः

(क) मम कटुता दाहहन्त्री परं पित्ततापान् दूरीकरोमि। ........................

(ख) वसन्ते प्राप्ते पुष्प-सौरभ-फलप्रचुराः मे शाखाः सन्ति। ........................

(ग) मम मूले भुजङ्गाः सन्ति तथापि परतापं नाशयामि। ........................

**9. (अ) अधोलिखितानां पङ्क्तीनाम् अन्वयं कुरुत–**

(क) गायन्तु मूढमनुजास्तव दोषगाथाः।

(ख) यः सर्वमर्पयति चान्यसुखस्य हेतोः।

(ग) नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्त्वभरैः समन्तात्।

**(आ) अधोलिखितस्य अन्वस्य पूर्तिम् उचिताव्ययपदैः कुरुत–**

(क) आम्र! ........................ ते दिवसाः गताः ये पुष्पसौरभफलप्रचुराः (भवन्ति स्म), हन्त! ........................ सम्प्रति छायया ........................ जनानाम् अतितापं दलयसि।

(ख) **अस्मिन् अन्वये क्रियापदानि रिक्तानि सन्ति। तानि तत्र लिखत।**

यः (वृक्षः) कुसुमपत्रफलावलीनां भरं ............................ घर्मव्यथां ............................ शीतभवां रुजं च (यः) अन्यसुखस्य हेतोः च सर्वम् ..............................., तस्मै वदान्यगुरवे तरवे नमः ........................।

# क्रियाकलापाः

**( अ ) मध्यकोष्ठकात् कर्तृपदं विचित्य वाक्यचतुष्टयं रचयत अव्ययपदानि च रेखाङ्कितानि कुरुत-**

| | | |
|---|---|---|
| तिष्ठन्ति आतपे सदा स्वयम् | | यच्छन्ति परेभ्यः अपि फलानि |
| | वृक्षाः | |
| परार्थे भृशं पीडाम् अनुभवन्ति | | छायाम् अन्यस्य खलु कुर्वन्ति |

**( आ ) यत्र, इव, सम्प्रति, एव, एतेषाम्, अव्ययपदानाम्, इत्थमेव खेलमाध्यमेन वाक्येषु प्रयोगं कुरुत।**

**( इ ) वृक्षस्य तेषाम् अङ्गानां नामानि लिखत यैः सः परोपकारं करोति। ( चित्रं कृत्वा अपि नामानि लेखितुं शक्यन्ते। )**

# अन्वयः

1. **अन्वयः** – छायाम् अन्यस्य (कृते) कुर्वन्ति, स्वयम् आतपे तिष्ठन्ति, (तेषाम्) फलानि अपि परार्थाय (भवन्ति), (अतः) वृक्षाः सत्पुरुषाः इव (सन्ति)।
2. **अन्वयः** – अहो! एषाम् सर्व-प्राणि-उपजीवनम् जन्म वरम्। महीरुहाः धन्याः येभ्यः अर्थिनः निराशाः न यान्ति।
3. **अन्वयः** – पत्र-पुष्प-फल-छाया-मूल-वल्कल-दारुभिः गन्ध-निर्यास-भस्म-अस्थि-तोक्मैः कामान् वितन्वते।
4. **अन्वयः** – (हे) आम्र! यद्यपि ते दिवसाः गताः ये पुष्प-सौरभ-फल-प्रचुराः (आसन्)। हन्त! तथापि सम्प्रति जनानाम् अतितापम् छायया एव दलयसि।
5. **अन्वयः** – भुजङ्गैः मूलम् (आश्रितम्) प्लवङ्गैः शिखरम् (आश्रितम्), विहङ्गैः शाखाः (आश्रिताः), भृङ्गैः कुसुमानि (आश्रितानि) चन्दन-पादपस्य तत् न एव अस्ति यत् समन्तात् सत्वभरैः न आश्रितम् ।
6. **अन्वयः** – निम्ब! त्वदीय-कटुता यदि दाहहन्त्री (अस्ति), मूढमनुजाः तव दोष-गाथाः गायन्तु। मित्रवर! तपन-उपम-पित्ततापैः तप्ताः ते एव (जनाः) तावक-गीतकानि गास्यन्ति।
7. **अन्वयः** – यः कुसुम-पत्र-फल-आवलीनाम् भरम् धत्ते, घर्मव्यथाम् शीतभवाम् रुजम् च वहति। यः अन्य-सुखस्य-हेतोः सर्वम् अर्पयति, तस्मै वदान्य-गुरवे तरवे नमः अस्तु॥

# योग्यताविस्तारः

**भावविस्तारः**

1. परोपकारिणः वृक्षाः सततं सेवारताः सन्ति। अस्माभिः अपि तद्वत् परोपकारिभिः भूत्वा जीवनयापनं कर्तव्यम्। पठत, स्मरत, अवगच्छत च एताः सूक्तयः–

   (i) परोपकारः पुण्याय पापाय परपीडनम्।

   (ii) परोपकाराय फलन्ति वृक्षाः, परोपकारार्थमिदं शरीरम्।

   (iii) नमन्ति फलिनो वृक्षाः, नमन्ति गुणिनो जनाः।

   (iv) विभाति कायः खलु सज्जनानां परोपकारेण न चन्दनेन।

   (v) अध्वनि अध्वनि तरवः पथि पथि पथिकैः उपास्यते छाया।

## कोऽहं वदतु साम्प्रतम्

दीर्घपत्रोऽपि नाशोकः
त्वग्धरः पीतवर्णकः।
सगुच्छोऽपि न मृद्वीका
कोऽस्म्यहं वद मे द्रुतम्॥

**भावार्थः** – दीर्घपत्रयुक्तः अस्मि परम् अशोकवृक्षः नास्मि, पीतवर्णकं वल्कलं धारयामि, गुच्छेषु भवामि किन्तु द्राक्षाफलं नास्मि। शीघ्रं वदतु कः अहम् अस्मि इति?

## एहि हसाम

उद्यानस्य द्वारे फलकम् आसीत्– 'उद्याने विहारः निश्शुल्कः' इति। एतत् पठित्वा सन्तुष्टः कश्चन कृपणः उद्यानस्य अन्तः गन्तुम् उद्युक्तः आसीत्।

**उद्यानपालकः** – (तस्य प्रवेशं निवारयन्)– "प्रवेशार्थं दश रूप्यकाणि दातव्यानि भवता" इति।

**कृपणः** – "निश्शुल्कः विहारः इति खलु फलके लिखितम् अस्ति?"

**उद्यानपालकः** – (शान्तस्वरेण) "अन्तः विहारः निश्शुल्कः एव। किन्तु प्रवेशस्तु सशुल्कः अस्ति" इति।